International Journal of Sanskrit Research 2025; 11(1): 33-38

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(1): 33-38
© 2025 IJSR
www.anantaajournal.com
Received: 19-11-2024
Accepted: 22-12-2024

**Bikram Badyakar**
Department of Sanskrit, University of Delhi (North Campus) Delhi, India

**Corresponding Author:**
**Bikram Badyakar**
Department of Sanskrit, University of Delhi (North Campus) Delhi, India

# संस्कृतसाहित्ये शुकसारिकाप्रलापनकला

**Bikram Badyakar**

**सारांश**

शिवस्योपलब्धये सत्यस्य सौन्दर्यमयी अभिव्यक्तिः कला इत्युच्यते। भारतीयसंस्कृतौ कलाभिरेव सौन्दर्योपासना आनन्दोपासना च क्रियेते। कलेयं अपूर्णं पूर्णं करोति, असुन्दरं सुन्दरं तथा अशिवं शिवं करोति। कला एव जीवनस्य छन्दः, प्राणस्य सरसमुच्छलनम्, सृष्टेर्मूलमन्त्रः दिव्यानन्दस्याक्षयः उत्सः। संस्कृतसाहित्ये कलायाः एका सुसमृद्धा परम्परा परिलक्ष्यते । संसारस्यास्य प्राचीनतमग्रन्थे ऋग्वेदे कला शब्दस्य उल्लेखोऽस्ति। अनन्तरं उपनिषत्सु, ललितविस्तरे रामायणे, महाभारते, कामसूत्रे, राजशेखरप्रणीतायां काव्यमीमांसायां, क्षेमेन्द्रस्य कलाविलासे इत्यादिषु कलायाः प्रसङ्गस्तथा आलोचना अस्ति। अस्याः कलायाः संख्याविषये मतभेदे स्थितेऽपि कलायाः परिनिष्ठित-संख्या चतुःषष्टिरेव। कामसूत्रे चतुःषष्टिसु कलासु शुकसारिकाप्रलापनम् अन्यतमम्। शुकसारिकयोः प्रलापनं न केवलं मनः मोदयति अपितु शुकसारिकाः च मन्त्रं स्तोत्रं च उच्चारयितुं समर्थाः, विरोहिण्याः नायिकायाः सङ्गित्वेन स्वीकृताः, तथा कदाचित् हितोपदेशं प्रदाय सन्मार्गेऽपि शुकः प्रेरयति। प्रस्तुते शोधपत्रे संस्कृतसाहित्यदृशा शुकसारिकाप्रलापनम् इति कला आलोचयिष्यते।

**कूट शब्द** : कला, सौन्दर्यम्, कला-परम्परा, कामसूत्रम्, शुकसारिकाप्रलापनम्, मनोविनोदनम्

## प्रस्तावना

पृथिव्यां मनुष्यव्यतिरिक्तानामन्येषां प्राणिनां जन्मनः परवर्ती जीवनकालः प्रायः सुनिर्दिष्टं भवति। ते मनुष्येतराः प्राणिनः खादन्ति, निद्रां कुर्वन्ति, भयस्तेषां जीवनस्यांशः, मैथुनं कुर्वन्ति च।[1] अनन्तरं ते मृत्युं प्राप्नुवन्ति। आहारादिकं विहाय तेषां न अन्या सम्भावना अस्ति। किन्तु मनुष्यः अनन्तः सम्भावनामयो जीव इति स्वीक्रियते। आहारनिद्राभयमैथुनानां वहिरपि तेषामनन्ता सम्भावना विद्यते। स ज्ञानचर्चां कर्तुं शक्नोति, बुद्धेः प्रयोगं विदधाति, चिन्ताशक्तिं व्यवहरति, अनन्तशक्तिधरश्च स। उपनिषदामृषयः मनुष्यस्य एतादृशीं सम्भावनां दृष्टवन्तः। तदर्थमेव ते ऋषयः मनुष्यान् अमृतस्य पुत्रत्वेन अङ्गीकृतवन्तः "शृणवन्तु विश्वे

---

[1] आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ।।हितोपोदेश /प्रस्ताविका / २५ ।

**अमृतस्य पुत्रा:**”।[2] स आत्मन: प्रतिभाबलेन सृजति, काव्यं रचयति, सङ्गीतं निर्माति, कलाचर्चायां संलग्न: भवितुमर्हति च। महाकवि: भर्तृहरि: साहित्यसङ्गीतकला: एव मनुष्यपश्वो: विभाजनसीमारूपेण स्वीकरोति –

“साहित्य संगीतकलाविहीन: साक्षात्पशु: पुच्छविषाणहीन:।
तृणन्न खादन्नपि जीवमान: तद्भागधेयं परमं पशूनाम्॥”[3]

अथर्ववेदेऽपि[4] स्रष्टुमादिष्टमृषिभि:, सृजनं विना अस्यां सृष्ट्यां मनुष्यस्य महिमा नास्त्येव। अस्य सृजनस्य पराकाष्ठा भवति कला । शिवस्योपलब्धये सत्यस्य सौन्दर्यमयी अभिव्यक्ति: कलात्वेन परिभाष्यते । न केवलं कलायामानन्दं स्यात् अपि तु सौन्दर्यमपि स्यात् । सौन्दर्यस्यान्वेषणं मनुष्याणां सहजा प्रकृतिरेव । इयं सौन्दर्यस्य भावना एव कलाया: उत्पत्तेर्मूलम् । गीतायां भगवान् श्रीकृष्ण: उद्घोषयति - यत् यत् ऐश्वर्ययुक्तं, सौन्दर्ययुक्तं शक्तियुक्तं वस्तु तत्तत् वस्तु मे तेजसोऽंशसम्भवमिति ज्ञेयम्।[5] अर्थात् सौन्दर्यं ऐश्वरिकगुणरिति । सौन्दर्यानुभवो मनुष्यचेतसो नैसर्गिकगुण:। सुरम्यविषयान् प्रति मनुष्यचित्तं स्वत एव धावति। रमणीयविषयमवलोक्य मनुष्य: आश्चर्यचकितो भवति, तस्य अहंबोधो विलुप्यते, किञ्चिन्निमेषं व्याप्य स अपूर्वं पारलौकिकमानन्दमनुभवति। तदर्थमेव समाम्नातं दुष्यन्तेन अभिज्ञानशकुन्तले –

“रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितोऽपि जन्तु:।
तच्चेतसा स्मरति नूनमबोधपूर्वं
**भावस्थिराणि जननान्तरसौहृदानि ॥**”[6]

इयं सौन्दर्यैरलंकृता च वसुन्धरा परमात्मना सृष्टा एका कलैव यस्या: वसुन्धराया: सर्वेषु अंशेषु लावण्यमण्डितं रूपं परिव्याप्तं परिदृश्यते । उषाया: नीलच्छाया, प्रभाते सूर्योदयस्य रक्तिमा, विहगानां कलरवक्रिया, कोकिलस्य मधुरध्वनि:, स्रोतस्विन्या: कलकलशब्द:, विस्तरस्य समुद्रस्य नीलिमा, निश्चल: सूच्च: पर्वत:, अस्तगामी सूर्य:, सन्ध्याया: धूसरता, निस्तब्धा कृष्णा रात्रि:, निष्पाप: पशुपक्षी, वर्षाकालीन: घनमेघस्य कृष्णता, वृष्टिपतनस्य स्निग्धता, वसन्तकालिन: कुसुमस्य सौरभविशिष्ट: समीरण:, तृणाच्छादितमुद्यानम्, आकाशे चित्रपतङ्गिकाया: उड्डयनम् - एतुषु सर्वेषु अपूर्वं रूपं, लावण्यं सौन्दर्यञ्च विराजन्ते। किञ्च परमात्मना सृष्टा मानवनार्याकृतिरपि अत्यन्तं हृदयाभिरामा । तदर्थमेव दुष्यन्त: शकुन्तलां निवर्णयति –

“चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रूपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरन्तसृष्टिपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्या:॥”[7]

नारीदेहस्य पुरुषदेहस्य वा अनुकृतौ मूर्तिकलाया: उद्भव: तथा चित्रकलायाश्च जन्म । कोकिलस्य मधुरस्वरस्यानुकरणे सङ्गीतकला सृजेत्। अस्मादेव कारणात् सम्भवत: प्लेटो कलाया: लक्षणे अनुकृतिमेव महत्तवं दत्तवान् । तन्मतेन अनुकृतिरेवास्ति कला इति । शुक्राचार्येण ऊररीकृतं ‘यत् कर्तुं एको मूको जनोऽपि समर्थ: सा कला’[8] उच्यते। ललितविस्तरग्रन्थे या: कला: आलोचिता: ता: पराक्रम-तेज-चतुरता-कुटिलता-शास्त्रज्ञानै: सह सम्बन्धिता दृश्यन्ते। परन्तु कामसूत्रे या कला निरूपिता सा लालित्य-विलास-सौन्दर्यै: समन्विता। वात्स्यायनस्य दृष्ट्यां कलाया: स्वरूपं मूलत: स्त्रीप्रसाधनं स्त्रीवशीकरणसाधनञ्च। यया कामिनीनां प्रसन्नता साधिता भवति, ता: कामिन्य: प्रेम्ना वशीभूता:

---

[2] श्वेताश्वरोपनिषद, अध्याय २, मंत्र ५

[3] नीतिशतकम् १२

[4] अथर्ववेद -५.४.१-११

[5] यद् यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोऽंशसम्भवम् ।। [गीता १०/४१]

[6] अभिज्ञानशकुन्तलम् ५/२

[7] अभिज्ञानशकुन्तलम् २/९

[8] शुक्रनीति: ४/३/२५

भवन्ति सा कलेति विनिगद्यते। कलामाध्यमेनैव वेश्या गणिकापदं लभते। दु:समयं कलाचर्चायामेव सुखेन यापितं भवति। मनोविनोदनस्य साधनरूपेणापि कलाया: प्रयोगो दरीदृश्यते। गीतं वाद्यं नृत्यम् आलेख्यम्[9] इत्येवं प्रकारेण चतु:षष्टि-कलानां सूची कामसूत्रकारेण प्रदर्शिता। तेषु अन्यतमं शुकसारिकाप्रलापनम्। शुकसारिकाभ्य: मानवीयव्यवहारस्य औचित्यपूर्णं शिक्षादानं शुकसारिकाप्रलापनकला कथ्यते। संस्कृतसाहित्ये शुकसारिका: यथा गृहं शोभयन्ति तथैव मनोविनोदनेऽपि सहायतां कुर्वन्ति।

**पर्यालोचना**

आकाशचारिणां विहगानां धरण्यां निवासकारिणां मनुष्यणां च मध्ये स्नेहसम्बन्धेन या कला सुपुष्पिता सा कला शुकसारिकाप्रलापनम् इत्युच्यते। शुकसारिकाप्रलापनं नाम शुकसारिकानां पाठनं ताभि: सह वार्तालापश्च। असंख्यकेषु पक्षीषु शुकसारिकानां मध्ये एव मनुष्यवद्भाषणस्य क्षमता कौशलश्च विद्येते। अत एताभ्यो भाषणनिमित्तं शिक्षादानं ताभि: वार्तालापश्चापि कलात्वेनाङ्गीक्रियते। एतासां मधुर: प्रलाप: मनोविनोदनस्य साधनत्वात् मनुष्यै: एता: पञ्जरबद्धा: क्रियन्ते स्म। प्रसङ्गेऽस्मिन् एकं सुभाषितमपि आश्रुयते –

> "आत्मनो मुखदोषेण बध्यन्ते शुकसारिका:।
> वकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम्।।"[10]

एतासां मधुरप्रलापनस्य सामर्थ्ये कारणत्रयं वर्तते –

1. पूर्वजन्मन: सञ्चित: संस्कार:
2. पुरुषप्रयत्नम् अर्थात् शिक्षा
3. निरन्तरं श्रवणम्

तदेव मन्त्रिणा कुमारपालितेन राज्ञ: शूद्रकस्य समीपे व्याहृतं कादम्बर्या –

> "एते हि शुकसारिकाप्रभृतयो विहङ्गमविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तत्राप्यन्यजन्मनोपात्तसंस्कारानुबन्धनेन वा पुरुषप्रयत्नेन वा संस्कारातिशय उपजायत इति नातिचित्रम् ।।"[11]

प्राचीनभारतदेशे शुकसारिका गृहस्थानां गृहेषु, राजान्त:पुरेषु, गणिकालयेषु ऋषीणां तपोवनेषु च सर्वत्र सम्मानिता: आसन्। तत्कालिकानां नागरकानां तापसानाञ्च एताभि: शुकसारिकाभि: पारिवारिक: सम्बन्ध आसीत्।

गीतं वाद्यं नृत्यमालेख्यमित्येवंप्रकारेण चतु:षष्टिकलानां सूची कामसूत्रकारेण प्रदत्ता। तासु शुकसारिकाप्रलापनमन्यतमम्। जयमङ्गलाटीकायां कलेयं परिस्कृततयोपवर्णिता दृश्यते - 'यदा शुकसारिका: मनुष्यभाषायां वक्तुं समर्था: भवन्ति तदा ता: सुभाषितमुच्चारयन्ति, एकस्य सेन्देश: अपरस्य समीपे प्रेषयन्ति।' [12] अर्थात् तासां पाठनं, ताभि: सह कथोकथनम्, ताभि: श्लोक-स्त्रोत्रादिमुच्चारणम् उपदेशकथनञ्च कलात्वेन परिभाष्यते। कामसूत्रस्य साधारणाधिकरणस्य नागरकवृत्तम् नाम चतुर्थाध्याये नागरकस्य अर्थात् सभ्य-विदग्धस्य कलाविलासपूर्णा दिवसचर्या निवर्णिता।तत्राभ्युदीरितं यत् - "पूर्वान्हे भोजनादनन्तरं नागरक: शुकसारिका: पाठयेत्, ताभि: सह भाषेत ।"[13]

कादम्बर्यां अन्त:पुरे प्रणयविषयनिपुण: परिहासनामा शुक: कालिन्दी नाम्नी सारिका च आस्ताम्।[14] तयो: शुकसारिकयो: प्रसङ्ग: सर्वेषां मनोविनोदनस्य कारणं भवति।

शयनगृहस्य वाचाल: शुक: वरवध्वो: रात्रिकालिनं विश्रम्भमालापं प्रात: गुरुजनानां समक्षं यथाश्रुतमुच्चारयति। तदा लज्जिता वधू:

[9] कामसूत्रम्, विद्यासमुद्देश:

[10] पञ्चतन्त्रम्, लब्धप्रणाशम् /४६

[11] कादम्बरी ( कथामुखम् ) शुकवर्णनम्

[12] " शुकसारिका हि मानुषभाषया प्रलापिता: सुभाषितं पठन्ति सन्देशं च कथयन्ति । "

[13] "भोजनान्तरं शुकसारिकाप्रलापनव्यापारा: " - कामसूत्रम्, नागरकवृत्तप्रकरणम्

[14] कादम्बरी - पृ.सं. ५६१-६४

कर्णावलम्बितपद्मरागशकलं तस्य शुकस्य चञ्च्वोः पुरं स्थापयित्वा कथमपि प्रकारेण तस्य वाग्रोधनं करोति –

“दम्पत्योर्निशि जल्पतो गृहशुकेनाकर्णितं यद्वचः
तत्प्रातर्गुरुसन्निधौ निगदतः श्रुत्वैव तारे वधूः।
कर्णावलम्बितपद्मरागशकलं विन्यस्य चञ्चवोः पुरं
क्रीडार्ता प्रकरोति दाडिमफलव्याजेन वाग्रोधनम् ।।” [15]

शुकसारिकाप्रलापनं न केवलं मनोविनोदनस्य साधनत्वेनाङ्गीकृतम् अपितु मुनिऋषीणां तपोवनमुषित्वा श्लोक- स्त्रोत्र-वेदपाठेष्वपि एताः अतीव निष्णाताः। कादम्बरीकारेण बाणभट्टेन स्वस्य पूर्वपुरुषाणां वर्णनायामाभिषतं यत् कुबेरस्य पालिताः शुकसारिकाः अधिगताः अखिलवेदवेदाङ्गाः आसन्। यजुर्वेदसामवेदयोः सस्वरं पाठिनः विद्यार्थिनः शुकसारिकाः प्रतिपदं निगृह्य तेषां विद्यार्थिनां त्रुटिमप्रादर्शयन् —

“जगुर्गृहेऽभ्यस्तसमस्तवाङ्मयैः
सांसारिकैः पञ्जरवर्तिभिः शुकैः।
निगृह्यमाणा वटवः पदे पदे
यजुंषि सामानि च यस्य शङ्किताः ।।” [16]

भगवान् शङ्कराचार्यः यदा मण्डनमिश्रेण सह शास्त्रार्थं कर्तुं माहिष्मतीं जगाम तदा तस्यां नगर्यां मण्डनमिश्रस्य गृहसंकेतं ज्ञातुं जलं नयन्तीः स्त्रीः पप्रच्छ। तदा ताः प्रत्युचूः —

“स्वतः प्रमाणं परतः प्रमाणं कीराङ्गनाः यत्र गिरो गिरन्ति।
द्वारस्थनीडान्तरसन्निरुद्धा जानीहि तं मण्डनमिश्रधाम।।” [17]

अर्थात् यत्र शुकसारिकाः "स्वतः प्रमाणं परतः प्रमाणं " इत्यस्य शास्तार्थं कुर्वन्त्यः द्वारस्थपञ्जरबद्धाः सन्ति तदेव मण्डनमिश्रस्य गृहम् अवगन्तव्यमिति।

[15] अमरुकशतकम् १३

[16] कादम्बरी कथामुखम् - श्लोक १२

[17] श्रीशङ्कदिग्विजय-८/६

वसन्तसेनायाः गृहेऽपि ब्राह्मणवत् सूक्तं पठन् शुकः अस्माभिर्दरीदृश्यते –

"दधिभक्तपूरितोदरो ब्राह्मण इव सूक्तं पठति
पञ्जरशुकः।"[18]

महाकविना बाणभट्टेन कादम्बर्यां गुणशाली शुकः उपवर्णितो यथा -

“नृत्तप्रयोगदर्शननिपुणश्चित्रकर्मणि प्रवीणो द्युतव्यापारो प्रगल्भः प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरो गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः. …….. ।”[19]

तदनन्तरं स शुकः महाराज्ञः शुद्रकस्याभिमुखो भूत्वा स्वस्य दक्षिणचरणमुर्द्धीकृत्य सुस्पष्टतया उदात्तादिस्वरयोगेन जयशब्दमुच्चारणपूर्वकमार्यां पपाठ –

“स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम् ।।”[20]

शुकसप्ततिकथायां प्रसङ्गोऽस्ति कुमार्गगामिनः पुत्रस्य कारणात् दुःखिताय सपत्नीकाय हरिदत्ताय तस्य सखा त्रिविक्रमनामा द्विजः स्वगृहतो नीतिनिपुणं शुकं सारिकां चानीय दत्तवान्[21]। तस्यैव शुकस्योपदेशेन कुमार्गगामी मदनविनोदस्तु सन्मार्गं प्ररितस्तथा अनन्तरं तस्य परपुरुषरमणेच्छुकायाः पत्न्याः प्रभावत्याः शीलमपि सप्ततिकथाभिः रक्षितम्।

शुकसारिकाः मनुष्याणां स्मृतिभिः सुखदुःखैः संयोगवियोगैश्च घनिष्ठत्वेन सम्पृक्ताः आसन्। अनेनैव कारणेन रामचन्द्रेण कौशल्यया पालिता सारिका स्मृता। सपत्नीकः रामचन्द्रः सीतया लक्ष्मणेन सह च

[18] मृच्छकटिक अङ्क ४, पृ.सं - २४१

[19] कादम्बरी ( कथामुखम् ) शुकवर्णनम्

[20] कादम्बरी ( कथामुखम् ) शुकवर्णनम्

[21] शुकसप्ततिकथा

वनवासनिमित्तं अयोध्यां परित्यज्य गङ्गानदीं तीर्त्वा वत्सदेशस्य कस्मिंश्चित् वृक्षतले विश्रामं नेतुं सायं उपाविशत्। तदा रामचन्द्रः लक्ष्मणं अकथयत् यत् क्षुद्रकर्मा कैकेयी द्वेषादन्यायमपि कर्तुं प्रायतत। कौशल्यां मातरं विषमपि दातुं शक्नुयात्।[22] कौशल्यया हि रामचन्द्रः अत्यन्तं कष्टेन परिबर्धितः। परन्तु फलकाले रामात् सेवादिकं न प्राप्यैव तस्मात् विप्रयुक्ता कौशल्या। कौशल्यायां रामादपि प्रीतिविशिष्टा सारिका शुकं निर्दिशति अरीणां पददंशनाय –

"मन्ये प्रीतिविशिष्टा सा मत्तो लक्ष्मण सारिका।
यत्तस्याः श्रुयते वाक्यं शुक पादमरे दश।।" [23]

मेघदुतेऽपि यक्षाद्वियोगविधुरा यक्षप्रिया पञ्जरस्थां सारिकां पृच्छन्ती दृश्यते यत्, "रसिके! त्वम् यक्षं स्मरसि वा? त्वम् तु स्वामिनः प्रिया इति"---

"पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थाम्।
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति।।" [24]

द्युतमृगयावेश्यासक्तो मदनविनोदः शुकोपदेशेन कुमार्गं परित्यज्य सन्मार्गं गृहीत्वा पितरौ क्लेशं दूरीकर्तुं वाणिज्यार्थं विदेशं गतवान्। तस्मिन् गते तस्य पत्नी प्रभावती कतिचिद्दिनानि शोकाभिभूता यापयित्वा व्याभिचारिणीभिः सखीभिः प्रतिबोधिता सा पुरुषान्तरासक्ता सञ्जाता।[25] किञ्च सा तेन परपुरुषेण सह रन्तुं गृहाद्वहिःगमने उद्यता सती तां निवारयति शुकः। सप्ततिकथाभिः सप्ततिदिवसं यावत् तस्याः पतिव्रताधर्मं कुलस्त्रियो धर्मञ्च शुकेन परिरक्षितम्।

**उपसंहारः**

मञ्जुवाक् शुको मधुरवचना सारिका च अनादिकालादेव मानवान् आकर्षतः। शुकस्य कण्ठदेशे इन्द्रधनुषवत् नीलपीतरक्तवर्णविशिष्टं कुण्डलम्, रमणीया रक्तिमा चञ्चुः, मरकतमणिना सदृशोऽस्ति हरितवर्णोपेतानि पत्राणि तथा च सारकियाः कुमुदपुष्पस्य परागवत् पीतवर्णयुक्तौ पादौ, चम्पकपुष्पस्य कलिकातुल्यं मुखम्, नीलकमलदलवत् नीलानि पत्राणि कथं न आकर्षन्ति सौन्दर्यानुसन्धानचित्तान् मनुष्यान्। अस्मादेव कारणात् शुकसारिका प्राचीनसमये भारतस्य गृहशोभां अजनयत। मानवस्य सुखदुःखादिभिः अनुभुतिभिः सम्पृक्ताः सञ्जाताः शुकसारिकाः। मनुष्यविहगयोः अन्तःरङ्ग-प्रेमसम्बन्धादेव शुकसारिकाप्रलापनकला सञ्जाता। अनेनैव कारणेन शुकं पाठयन्त्याः युवत्याः मूर्तिकला निर्मिता अभवत्। खजुराहो- विश्वनाथमन्दिरस्य, भुवनेश्वर-मुक्तेश्वरमन्दिरस्य, कोणार्कमन्दिरस्य च भित्तिषु शुकेन सह क्रीडन्ती स्त्री मूर्तिरूपेण निर्मिता दृश्यते।

[22] रामायण -२/५३/१८

[23] रामायण -२/५३/२२

[24] उत्तरमेघः- श्लोक २५

[25] " पश्चातत्पत्नी कतिचिद्दिनानि शोकयुक्ता निर्वाह्य स्वैरिणीभिः सखीभिः प्रतिबोधिता पुरुषान्तराभिलासषुकाभवत् ।" - शुकसप्ततिः

**सन्दर्भ सूची**


1. घोषः, डॉ. (श्रीमती) इला. संस्कृतवाङ्मये शिल्पकलाः, दिल्ली : ईस्टर्न बुक लिंकर्स , २००४.
2. शर्मा, डॉ. रामदत्तः. संस्कृतकाव्येषु पशु-पक्षी. जयपुरम्: देवनागर- प्रकाशनम्, १९७१.
3. Dave KN. Birds in Sanskrit literature. Varanasi: Motilal Banarasidas, 1985.
4. झा, वैद्यनाथशास्त्री (व्याख्याकारः). मेघदूतम्. चतुर्थसंस्करणम्. वाराणसी: कृष्णदास-अकादमी, २००४.
5. भटनागरः, डॉ. मधुरलता. ललितकलासु सौन्दर्यविधानम्. दिल्लीविश्वविद्यालयः:हिन्दी-माध्यम-कार्यान्वय-निदेशालयः, २०१३.
6. गुप्तः, गोकुलदास; (टीकाकार;). पञ्चतन्त्रम्. वाराणसी: चौखाम्बा- विद्याभवनम्, २०१५.
7. माधवाचार्यः(व्याख्याकारः). कामसूत्रम् (वात्स्यायनमुनिप्रणीतम्). बम्बई: खेमराज-श्रीकृष्णदास-प्रकाशनम्, संवत् २०७८.
8. शास्त्री, श्रीदेवदत्तः (व्याख्याकारः). कामसूत्रम् (वात्स्यायनमुनिप्रणीतम्). वाराणसी: चौखाम्भासंस्कृतसंस्थानम्, २०१९.

9. चक्रवर्ती, सत्यनारायणः (सम्पादकः). अभिज्ञानशुकन्तलम्. षष्ठसंस्करणम्. कलकाताः संस्कृतपुस्तकभाण्डारः, 2005.
10. गोयेन्दका, जयदयाल (व्याख्याकार). श्रीमद्भगवद्गीता. गोरखपुरम्: गीता प्रेस.
11. ईशादि नौ उपनिषद्. गोरखपुरम्: गीताप्रेस.
12. गुप्तः, डॉ. किशोरीलालः (व्याख्याकारः). अमरुकशतकम्. प्रथमसस्करणम्. इलाहावादम्: जयभारतीप्रकाशनम्, १९९४.
13. उपाध्यायः, बलदेवः (अनुवादकः). श्रीशङ्करदिग्विजय (माधवाचार्यविरचित). हरद्वारम्: महन्तशान्तानन्दनाथप्रकाशनम्, संवत् २०००.
14. त्रिपाठी, डॉ. रमाकान्तः (व्याख्याकारः). शुकसप्ततिः. तृतीयसंस्करणम्. वाराणसीः चौखाम्बा -संस्कृत - सीरीज, २०२१.
15. मुसलगाँवकरः, राजेश्वरशास्त्री (टीकाकारः). नीतिशतकम्. तृतीयसंस्करणम्. वाराणसीः चौखाम्भा प्रकाशन, वि.सं २०६८
16. रामायणम्. गोरखपुरम्: गीताप्रेस.
17. विद्यालङ्कारः, श्रीहरिश्चन्द्रः (अनुवादकः). कादम्बरी (पूर्वार्द्धम्). प्रथमसंस्करणम्. वाराणसीः मोतीलाल-बनारसीदासः, १९७२.
18. मिश्रः, अभिराजराजेन्द्रः ( व्याख्याकारः). कादम्बरी-कथामुखम्. इलाहाबादः अक्षयवट- प्रकाशन, २०१९.